श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ दशमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ दशमः सर्गः ॥

## रावणभवनं गत्वापशकुनभयं प्रदर्श्य सीतानिवर्तनाय रावणं प्रति विभीषणस्य प्रार्थना, तामनङ्गीकृत्य रावणेन तस्य ततो विसर्जनम्

ततः प्रत्युषसि प्राप्ते प्राप्तधर्मार्थनिश्चयः।
राक्षसाधिपतेर्वेश्म भीमकर्मा विभीषणः॥ **6.10.1** ॥

शैलाग्रचयसङ्काशं शैलशृङ्गमिवोन्नतम्।
सुविभक्तमहाकक्षं महाजनपरिग्रहम्॥ **6.10.2** ॥

मतिमद्भिर्महामात्रैरनुरक्तैरधिष्ठितम्।
राक्षसैराप्तपर्याप्तैः सर्वतः परिरक्षितम्॥ **6.10.3** ॥

मत्तमातङ्गनिःश्वासैर्व्याकुलीकृतमारुतम्।
शङ्खघोषमहाघोषं तूर्यसम्बाधनादितम्॥ **6.10.4** ॥

प्रमदाजनसम्बाधं प्रजल्पितमहापथम्।
तप्तकाञ्चननिर्यूहं भूषणोत्तमभूषितम्॥ **6.10.5** ॥

गन्धर्वाणामिवावासमालयं मरुतामिव।
रत्नसञ्चयसम्बाधं भवनं भोगिनामिव॥ **6.10.6** ॥

तं महाभ्रमिवादित्यस्तेजोविस्तृतरश्मिवान्।
अग्रजस्यालयं वीरः प्रविवेश महाद्युतिः॥ **6.10.7** ॥

पुण्यान् पुण्याहघोषांश्च वेदविद्भिरुदाहृतान्।
शुश्राव सुमहातेजा भ्रातुर्विजयसंश्रितान्॥ **6.10.8** ॥

पूजितान् दधिपात्रैश्च सर्पिर्भिः सुमनोक्षतैः।
मन्त्रवेदविदो विप्रान् ददर्श स महाबलः॥ **6.10.9** ॥

स पूज्यमानो रक्षोभिर्दीप्यमानं स्वतेजसा।
आसनस्थं महाबाहुर्ववन्दे धनदानुजम्॥ **6.10.10** ॥

स राजदृष्टिसम्पन्नमासनं हेमभूषितम्।
जगाम समुदाचारं प्रयुज्याचारकोविदः॥ **6.10.11** ॥

स रावणं महात्मानं विजने मन्त्रिसन्निधौ।
उवाच हितमत्यर्थं वचनं हेतुनिश्चितम्॥ **6.10.12** ॥

प्रसाद्य भ्रातरं ज्येष्ठं सान्त्वेनोपस्थितक्रमः।
देशकालार्थसंवादि दृष्टलोकपरावरः॥ **6.10.13** ॥

यदाप्रभृति वैदेही सम्प्राप्तेह परन्तप।
तदाप्रभृति दृश्यन्ते निमित्तान्यशुभानि नः॥ **6.10.14** ॥

सस्फुलिङ्गः सधूमार्चिः सधूमकलुषोदयः।
मन्त्रसन्धुक्षितोऽप्यग्निर्न सम्यगभिवर्धते॥ **6.10.15** ॥

अग्निष्टेष्वग्निशालासु तथा ब्रह्मस्थलीषु च।
सरीसृपाणि दृश्यन्ते हव्येषु च पिपीलिकाः॥ **6.10.16** ॥

गवां पयांसि स्कन्नानि विमदा वरकुञ्जराः।
दीनमश्वाः प्रहेषन्ते नवग्रासाभिनन्दिनः॥ **6.10.17** ॥

खरोष्ट्राश्वतरा राजन् भिन्नरोमाः स्रवन्ति च।
न स्वभावेऽवतिष्ठन्ते विधानैरपि चिन्तिताः॥ **6.10.18** ॥

वायसाः सङ्घशः क्रूरा व्याहरन्ति समन्ततः।
समवेताश्च दृश्यन्ते विमानाग्रेषु सङ्घशः॥ **6.10.19** ॥

गृध्राश्च परिलीयन्ते पुरीमुपरि पिण्डिताः।
उपपन्नाश्च सन्ध्ये द्वे व्याहरन्त्यशिवं शिवाः॥ **6.10.20** ॥

क्रव्यादानां मृगाणां च पुरीद्वारेषु सङ्घशः।
श्रूयन्ते विपुला घोषाः सविस्फूर्जितनिःस्वनाः॥ **6.10.21** ॥

तदेवं प्रस्तुते कार्ये प्रायश्चित्तमिदं क्षमम्।
रोचये वीर वैदेही राघवाय प्रदीयताम्॥ **6.10.22** ॥

इदं च यदि वा मोहाल्लोभाद् वा व्याहृतं मया।
तत्रापि च महाराज न दोषं कर्तुमर्हसि॥ **6.10.23** ॥

अयं हि दोषः सर्वस्य जनस्यास्योपलक्ष्यते।
रक्षसां राक्षसीनां च पुरस्यान्तःपुरस्य च॥ **6.10.24** ॥

प्रापणे चास्य मन्त्रस्य निवृत्ताः सर्वमन्त्रिणः।
अवश्यं च मया वाच्यं यद् दृष्टमथवा श्रुतम्।
सम्प्रधार्य यथान्यायं तद् भवान् कर्तुमर्हति॥ **6.10.25** ॥

इति स्वमन्त्रिणां मध्ये भ्राता भ्रातरमूचिवान्।
रावणं रक्षसां श्रेष्ठं पथ्यमेतद् विभीषणः॥ **6.10.26** ॥

हितं महार्थं मृदु हेतुसंहितं
    व्यतीतकालायतिसम्प्रतिक्षमम्।
निशम्य तद्वाक्यमुपस्थितज्वरः
    प्रसङ्गवानुत्तरमेतदब्रवीत्॥ **6.10.27** ॥

भयं न पश्यामि कुतश्चिदप्यहं
    न राघवः प्राप्स्यति जातु मैथिलीम्।
सुरैः सहेन्द्रैरपि सङ्गरे कथं
    ममाग्रतः स्थास्यति लक्ष्मणाग्रजः॥ **6.10.28**॥

इत्येवमुक्त्वा सुरसैन्यनाशनो
    महाबलः संयति चण्डविक्रमः।
दशाननो भ्रातरमाप्तवादिनं
    विसर्जयामास तदा विभीषणम्॥ **6.10.29**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे दशमः सर्गः॥